श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे

# ॥ श्रीवेङ्कटेशद्वादशनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवेङ्कटेशद्वादशनामस्तोत्रम् ॥

अस्य श्रीवेङ्कटेशद्वादशनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः।
अनुष्टुप् छन्दः।
श्रीवेङ्कटेश्वरो देवता।
इष्टार्थे विनियोगः॥

नारायणो जगन्नाथो वारिजासनवन्दितः।
स्वामिपुष्करिणीवासी शङ्खचक्रगदाधरः॥ १ ॥

पीताम्बरधरो देवो गरुडासनशोभितः।
कन्दर्पकोटिलावण्यः कमलायतलोचनः॥ २ ॥

इन्दिरापतिगोविन्दः चन्द्रसूर्यप्रभाकरः।
विश्वात्मा विश्वलोकेशो जयश्रीवेङ्कटेश्वरः॥ ३ ॥

एतद्द्वादशनामानि त्रिसन्ध्यं यः पठेन्नरः।
दारिद्र्यदुःखनिर्मुक्तो धनधान्यसमृद्धिमान्॥ ४ ॥

जनवश्यं राजवश्यं सर्वकामार्थसिद्धिदम्।
दिव्यतेजः समाप्नोति दीर्घमायुश्च विन्दति॥ ५ ॥

ग्रहरोगादिनाशं च कामितार्थफलप्रदम्।
इह जन्मनि सौख्यं च विष्णुसायुज्यमाप्नुयात्॥ ६ ॥

॥ इति श्रीवेङ्कटेशद्वादशनामस्तोत्रं सम्पूर्णम् ॥

www.prapatti.com